Totalbhakti.com

# सूर्यकवचम्

किं छत्रं किंनु तिलकमुत तथा कुंडलं कौस्तुभो वा

चक्रं वा वारिजं वेत्यमरयुवतिभिर्यद्वलिद्वेषिदेहे ।

ऊर्ध्वं मौलौ ललाटे श्रवसि हृदि करे नाभिदेशे च दृष्टं

पायात्तद्वोऽर्कबिम्ब स च दनुजरिपुर्वर्धमानः क्रमेण ॥

श्रीगणेशाय नामः ॥

श्रीसुर्य उवाच । सांब सांब महाबाहो श्रृणृ मे कवचं शुभम् ।

त्रैलोक्यमंगलं नाम कवचं परमाद्भुतम् ॥१॥

यज्ज्ञात्वा मंत्रवित्सम्यक् फलं प्राप्नोति निश्चितम् ।

यद्धृत्वा च महादेवो गणानामधिपोऽभवत् ॥२॥

पठनाध्दारणादिष्णुः सर्वेषां पालकः सदा ।

एकमिन्द्रादयःसर्व सर्वैश्वर्यमवाप्नुयु : ॥३॥

कवचस्य ऋषिर्ब्रह्मा छंदोऽनुष्टुबुदाहृतः ।

श्रीसुर्यो देवता चात्र सर्व देवनमस्कृतः ॥४॥

यश आरोग्यमोक्षेषु विनियोगः प्रकीर्तितः ।

प्रणवो मे शिरः पातु घृणिर्मे पातु भालकम् ॥५॥

सुर्योऽव्यान्नयनद्वंद्व मादित्यः कर्णयुग्मकम् ।

अष्टाक्षरो महामंत्र : सर्वाभीष्टफलप्रदः ॥६॥

www.totalbhakti.com

ह्रीं बीजें मे मुखं पातु हृदयं भुवनेश्वरी ।

चन्द्रबिंबं विंशदाद्यं पातु मे गुह्यदेशकम् ॥७॥

अंक्षरोऽसौ महामन्त्रः सर्वतन्त्रेषु गोपितः ।

शिवो वह्निसमायुक्तो वामाक्षीबिंदुभूषित : ॥८॥

एकाक्षरो महामन्त्रः श्रीसुर्यस्य प्रकीर्तितः ।

गुह्याद्गुह्यतरो मन्त्रो वांछाचिंतामणिः स्मृतः ॥९॥

शीर्षादिपादपर्यंतं सदा पातु मनूत्तमः ।

इति ते कथितं दिव्य त्रिषु लोकेषु दुर्लभम् ॥१०॥

श्रीप्रदं कांतिदं नित्यं धनारोग्यविवर्धनम् ।

कुष्ठादिरोगशमनं महाव्याविनाशनम् ॥११॥

त्रिसंध्यं यः पठोन्नित्यमरोगी बलवान् भवेत् ।

बहुना किमिहोक्तेन यद्यन्मनसि वर्तते ॥१२॥

तत्तत्सर्व भवेत्तस्य कवचस्य च धारणात् ।

भूतप्रेतपिशाचाश्च यक्षगंधर्वराक्षसाः ॥१३॥

ब्रह्मराक्षसवेताला न द्रष्टुमपि तं क्षमाः ।

दुरादेव पलायंते तस्य संकीर्तनादपि ॥१४॥

भुर्जपत्रे समालिख्य रोचनागुरुकुंकुमैः ।

रविवारे च संक्रांत्यां सप्तम्यां च विशेषतः ॥१५॥

धारयेत्साधकश्रेष्ठः श्रीसूर्यस्य प्रियो भवेत् ।

www.totalbhakti.com

त्रिलौहमध्यगं कृत्वा धारयेत्साद्दक्षिणे करे ॥१६॥

शिखायामथवा कंठे सोऽपि सूर्यो न संशयः ।

इति ते कथितं सांब त्रैलोक्यमंगलाभिधम् ॥१७॥

कवचं दुर्लभं लोके तव स्नेहात्प्रकाशितम् ।

अज्ञात्वा कवचं दिव्यं यो जपेत्सूर्यमुत्तमम् ॥१८॥

सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि ॥१९॥

**इति श्रीब्रह्मयामले त्रैलोक्यमंगलं नाम सूर्यकवचं संपूर्णम् ।**

www.totalbhakti.com